श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ द्वादशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्वादशः सर्गः ॥

**पुर्याः परिरक्षणाय सैनिकानां नियुक्तिः सीतायां स्वीयामासक्तिं प्रतिपाद्य रावणेन तस्या हरणप्रसङ्गस्य वर्णनं भाविकर्तव्यनिर्णयाय सभासत्सम्मतेः प्रार्थनं कुम्भकर्णेन रावणं निर्भर्त्स्य समस्तशत्रुवधभारस्य स्वयमेवोत्थापनम्**

स तां परिषदं कृत्स्नां समीक्ष्य समितिञ्जयः।
प्रचोदयामास तदा प्रहस्तं वाहिनीपतिम् ॥ **6.12.1** ॥

सेनापते यथा ते स्युः कृतविद्याश्चतुर्विधाः।
योधा नगररक्षायां तथा व्यादेष्टुमर्हसि ॥ **6.12.2** ॥

स प्रहस्तः प्रणीतात्मा चिकीर्षन् राजशासनम्।
विनिक्षिपद् बलं सर्वं बहिरन्तश्च मन्दिरे ॥ **6.12.3** ॥

ततो विनिक्षिप्य बलं सर्वं नगरगुप्तये।
प्रहस्तः प्रमुखे राज्ञो निषसाद जगाद च ॥ **6.12.4** ॥

विहितं बहिरन्तश्च बलं बलवतस्तव।
कुरुष्वाविमनाः क्षिप्रं यदभिप्रेतमस्ति ते ॥ **6.12.5** ॥

प्रहस्तस्य वचः श्रुत्वा राजा राज्यहितैषिणः।
सुखेप्सुः सुहृदां मध्ये व्याजहार स रावणः ॥ **6.12.6** ॥

प्रियाप्रिये सुखे दुःखे लाभालाभे हिताहिते।
धर्मकामार्थकृच्छ्रेषु यूयमर्हथ वेदितुम् ॥ **6.12.7** ॥

सर्वकृत्यानि युष्माभिः समारब्धानि सर्वदा।
मन्त्रकर्मनियुक्तानि न जातु विफलानि मे॥ **6.12.8**॥

ससोमग्रहनक्षत्रैर्मरुद्भिरिव वासवः।
भवद्भिरहमत्यर्थं वृतः श्रियमवाप्नुयाम्॥ **6.12.9**॥

अहं तु खलु सर्वान् वः समर्थयितुमुद्यतः।
कुम्भकर्णस्य तु स्वप्नान्नेममर्थमचोदयम्॥ **6.12.10**॥

अयं हि सुप्तः षण्मासान् कुम्भकर्णो महाबलः।
सर्वशस्त्रभृतां मुख्यः स इदानीं समुत्थितः॥ **6.12.11**॥

इयं च दण्डकारण्याद् रामस्य महिषी प्रिया।
रक्षोभिश्चरितोद्देशादानीता जनकात्मजा॥ **6.12.12**॥

सा मे न शय्यामारोढुमिच्छत्यलसगामिनी।
त्रिषु लोकेषु चान्या मे न सीतासदृशी तथा॥ **6.12.13**॥

तनुमध्या पृथुश्रोणी शरदिन्दुनिभानना।
हेमबिम्बनिभा सौम्या मायेव मयनिर्मिता॥ **6.12.14**॥

सुलोहिततलौ श्लक्ष्णौ चरणौ सुप्रतिष्ठितौ।
दृष्ट्वा ताम्रनखौ तस्या दीप्यते मे शरीरजः॥ **6.12.15**॥

हुताग्नेरर्चिसङ्काशामेनां सौरीमिव प्रभाम्।
उन्नसं विमलं वल्गु वदनं चारुलोचनम्॥ **6.12.16**॥

पश्यंस्तदवशस्तस्याः कामस्य वशमेयिवान्।
क्रोधहर्षसमानेन दुर्वर्णकरणेन च॥ **6.12.17**॥

शोकसन्तापनित्येन कामेन कलुषीकृतः।
सा तु संवत्सरं कालं मामयाचत भामिनी॥ **6.12.18**॥

प्रतीक्षमाणा भर्तारं राममायतलोचना।
तन्मया चारुनेत्रायाः प्रतिज्ञातं वचः शुभम्॥ **6.12.19** ॥

श्रान्तोऽहं सततं कामाद् यातो हय इवाध्वनि।
कथं सागरमक्षोभ्यं तरिष्यन्ति वनौकसः॥ **6.12.20** ॥

बहुसत्त्वझषाकीर्णं तौ वा दशरथात्मजौ।
अथवा कपिनैकेन कृतं नः कदनं महत्॥ **6.12.21** ॥

दुर्ज्ञेयाः कार्यगतयो ब्रूत यस्य यथामति।
मानुषान्नो भयं नास्ति तथापि तु विमृश्यताम्॥ **6.12.22** ॥

तदा देवासुरे युद्धे युष्माभिः सहितोऽजयम्।
ते मे भवन्तश्च तथा सुग्रीवप्रमुखान् हरीन्॥ **6.12.23** ॥

परे पारे समुद्रस्य पुरस्कृत्य नृपात्मजौ।
सीतायाः पदवीं प्राप्य सम्प्राप्तौ वरुणालयम्॥ **6.12.24** ॥

अदेया च यथा सीता वध्यौ दशरथात्मजौ।
भवद्भिर्मन्त्र्यतां मन्त्रः सुनीतं चाभिधीयताम्॥ **6.12.25** ॥

नहि शक्तिं प्रपश्यामि जगत्यन्यस्य कस्यचित्।
सागरं वानरैस्तीर्त्वा निश्चयेन जयो मम॥ **6.12.26** ॥

तस्य कामपरीतस्य निशम्य परिदेवितम्।
कुम्भकर्णः प्रचुक्रोध वचनं चेदमब्रवीत्॥ **6.12.27** ॥

यदा तु रामस्य सलक्ष्मणस्य
    प्रसह्य सीता खलु सा इहाहृता।
सकृत् समीक्ष्यैव सुनिश्चितं तदा
    भजेत चित्तं यमुनेव यामुनम्॥ **6.12.28** ॥

सर्वमेतन्महाराज कृतमप्रतिमं तव।
विधीयेत सहास्माभिरादावेवास्य कर्मणः॥ **6.12.29** ॥

न्यायेन राजकार्याणि यः करोति दशानन।
न स सन्तप्यते पश्चान्निश्चितार्थमतिर्नृपः॥ **6.12.30** ॥

अनुपायेन कर्माणि विपरीतानि यानि च।
क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव॥ **6.12.31** ॥

यः पश्चात् पूर्वकार्याणि कर्माण्यभिचिकीर्षति।
पूर्वं चापरकार्याणि स न वेद नयानयौ॥ **6.12.32** ॥

चपलस्य तु कृत्येषु प्रसमीक्ष्याधिकं बलम्।
छिद्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः॥ **6.12.33** ॥

त्वयेदं महदारब्धं कार्यमप्रतिचिन्तितम्।
दिष्ट्या त्वां नावधीद् रामो विषमिश्रमिवामिषम्॥ **6.12.34** ॥

तस्मात् त्वया समारब्धं कर्म ह्यप्रतिमं परैः।
अहं समीकरिष्यामि हत्वा शत्रूंस्तवानघ॥ **6.12.35** ॥

अहमुत्सादयिष्यामि शत्रूंस्तव निशाचर।
यदि शक्रविवस्वन्तौ यदि पावकमारुतौ।
तावहं योधयिष्यामि कुबेरवरुणावपि॥ **6.12.36** ॥

गिरिमात्रशरीरस्य महापरिघयोधिनः।
नर्दतस्तीक्ष्णदंष्ट्रस्य बिभीयाद् वै पुरन्दरः॥ **6.12.37** ॥

पुनर्मां स द्वितीयेन शरेण निहनिष्यति।
ततोऽहं तस्य पास्यामि रुधिरं काममाश्वस॥ **6.12.38** ॥

वधेन वै दाशरथेः सुखावहं
    जयं तवाहर्तुमहं यतिष्ये।
हत्वा च रामं सह लक्ष्मणेन
    खादामि सर्वान् हरियूथमुख्यान्॥ **6.12.39**॥

रमस्व कामं पिब चाग्र्यवारुणीं
    कुरुष्व कार्याणि हितानि विज्वरः।
मया तु रामे गमिते यमक्षयं
    चिराय सीता वशगा भविष्यति॥ **6.12.40**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वादशः सर्गः॥